# राजप्रश्नीयोपनिषद्



श्री पूज्यपादस्वामी

णमोत्थु णं
केसिस्स कुमारसमणस्स
मम
धम्मोवदेसगस्स
धम्मायरियस्स

परमपूजनीयश्रीस्थविरभगवत्प्रणीत-
राजप्रश्नीयोपाङ्गसूत्रस्य
सारसञ्चयरूपा

# राजप्रश्नीयोपनिषद्


• सञ्चयनम् - सम्पादनम् •

प्राचीनश्रुतोद्धारक

प.पू.आ.श्रीहेमचन्द्रसूरीश्वरशिष्याः

प.पू.आ.श्रीकल्याणबोधिसूरयः



प्रकाशकः

श्री जिनशासन आराधना ट्रस्ट

મૂળસૂત્ર : રાજપ્રશ્નીય ઉપાંગ સૂત્ર

મૂળ સૂત્રકાર : પરમપૂજનીય શ્રી સ્થવિરભગવંત

નવનિર્મિત

સંસ્કૃત સારસંચય : રાજપ્રશ્નીયોપનિષદ્

સંચયકાર + સંપાદક : પ્રાચીનશ્રુતોદ્ધારક પ.પૂ.આ.દે. શ્રીમદ્વિજય **હેમચન્દ્રસૂરીશ્વરજી** મહારાજાના શિષ્ય
પ.પૂ.આ.દે. શ્રીમદ્વિજય
**કલ્યાણબોધિસૂરીશ્વરજી** મહારાજા

સહયોગી : મુનિરાજશ્રી ભાવપ્રેમ-તત્ત્વપ્રેમ-
રાજપ્રેમવિજયજી મ.સા.

વિષય : પ્રદેશી રાજાની કથા

વિશેષતા : દર્શન, અધ્યાત્મ, વૈરાગ્યથી માંડીને
નાટ્યકળા સુધીના અનેકાનેક વિષયો પર
પ્રકાશ પાડતો એક અનુપમ ગ્રંથ.
(૪૫ આગમ અંતર્ગત એક આગમ સૂત્ર)

મુદ્રક : મલ્ટી ગ્રાફિક્સ
www.multygraphics.com

---

સને 2012 • પ્રથમ આવૃત્તિ • વિ.સં.૨૦૬૮ • વી.સં.૨૫૩૮

પ્રતિ : 500

*No Copyright. • Reproduction Welcome.*

## ❀ પ્રાપ્તિસ્થાન ❀

### 1) શ્રી અક્ષયભાઈ શાહ

506, પદ્મ એપાર્ટ., જૈન દેરાસર સામે, સર્વોદયનગર,
મુલુંડ (પ.), મુંબઈ-400 080. મો.: 9594555505
Email : jinshasan108@gmail.com

### 2) શ્રી ચંદ્રકાંતભાઈ સંઘવી

6-બી, અશોકા કોમ્પલેક્સ, જનતા અસ્પતાલ પાસે,
પાટણ (ઉ.ગુ.) ફોન : 9909468572

### 3) મલ્ટી ગ્રાફિક્સ


18, Vardhaman Bldg., 3rd Floor, Khotachi Wadi,
Prarthana Samaj, V. P. Road, Mumbai – 4.
Ph.: 23873222 / 23884222.
E-mail : support@multygraphics.com

---


પ્રસ્તુત પ્રકાશન જ્ઞાનનિધિમાંથી થયેલ છે. માટે ગૃહસ્થો જ્ઞાનનિધિમાં તેનું મૂલ્ય અર્પણ કરીને માલિકી કરી શકશે.

***Website : www.divineKnowledge.org.in***

## चरमतीर्थपतिः करुणासागरः श्रीमहावीरस्वामी




## અનરાધાર અનુગ્રહ



## अनन्तलब्धिनिधानः श्रीगौतमस्वामी

## पञ्चमगणधरः श्रीसुधर्मास्वामी



# કૃપા વરસે અનરાધાર

સિદ્ધાંતમહોદધિ સુવિશાલગચ્છસર્જક પ. પૂ. આચાર્યદેવ
**શ્રીમદ્વિજય પ્રેમસૂરીશ્વરજી મહારાજા**

વર્ધમાન તપોનિધિ ન્યાયવિશારદ પ. પૂ. આચાર્યદેવ
**શ્રીમદ્વિજય ભુવનભાનુસૂરીશ્વરજી મહારાજા**

અજોડ ગુરુસમર્પિત ગુણગણનિધિ પ. પૂ. પંન્યાસપ્રવર
**શ્રી પદ્મવિજયજી ગણિવર્ય**

સિદ્ધાંત દિવાકર પ. પૂ. ગચ્છાધિપતિ આચાર્યદેવ
**શ્રીમદ્વિજય જયઘોષસૂરીશ્વરજી મહારાજા**

વૈરાગ્યદેશનાદક્ષ પ. પૂ. આચાર્યદેવ
**શ્રીમદ્વિજય હેમચન્દ્રસૂરીશ્વરજી મહારાજા**

# ❀ પ્રકાશકીય ❀

કુશળ અધ્યાપકોની અધ્યાપનશૈલી એવી હોય છે, કે તેઓ પહેલા આખો પદાર્થ સમજાવી દે, પછી કહે, 'હવે ચોપડી ખોલો, ને વાંચો.' વાંચતા જઈએ ને જાણે વાર્તા હોય, એમ સમજાતું જાય. દુર્ગમ ગ્રંથ પણ સુગમ બની જાય.

આ જ શૈલી આગમ-અધ્યયનમાં પણ ઉપયોગી બને, એ માટે કુશળ અધ્યાપકની ગરજ સારે તેવી આ આગમ ઉપનિષદ્‌ની શ્રેણિ પ્રકાશિત કરતા રોમહર્ષ અનુભવીએ છીએ. અધિકારી સંયમી ભગવંતોનો આગમ-અભ્યાસ આ શ્રેણિ દ્વારા સુગમ બને...

અને અભ્યાસ બાદ પણ આ વિહારોપયોગી પ્રકાશનના આલંબને દીર્ઘ કાળ સુધી આગમિક પદાર્થોના પરાવર્તન થતા રહે... આ ઉપહાર આપણને બહુશ્રુતોનો ઉપહાર આપે.. એવી સહજ સંવેદના થાય છે. વંદન... પરમ કૃપાળુ પરમાત્માને. વંદન... પૂજનીય શ્રીગણધર ભગવંતો આદિ પૂર્વાચાર્યોને. વંદન... આગમ અધ્યયનનું આ આલંબન આપનાર પૂજ્યશ્રીને.

*લિ.*

***શ્રી જિનશાસન આરાધના ટ્રસ્ટ***


## ટ્રસ્ટીઓ

શ્રી ચંદ્રકુમાર જરીવાલા   શ્રી પુંડરીકભાઈ શાહ

શ્રી લલિતભાઈ કોઠારી   શ્રી વિનયચંદ્ર કોઠારી

णमोत्थु णं समणस्स भगवओ महावीरस्स
श्री प्रेम-भुवनभानु-पद्म-जयघोष-हेमचन्द्रसूरिभ्यो नमः

સાક્ષાત્કાર

ત્રણ ભવોની
સત્યકથા
જેની તાત્પર્યપરિણતિ
અનંત ભવયાત્રા પર
પૂર્ણવિરામ મુકી દેશે.

દેવતત્ત્વ
ગુરુતત્ત્વ
અને ધર્મતત્ત્વના
અદ્ભુત માહાત્મ્યનો સાક્ષાત્કાર કરવા
એક અણમોલ આલંબન.

એ સાથે છે
આપણે સાર્થક કરી લઈએ.

– આ. કલ્યાણબોધિસૂરિ

अथ

# राजप्रश्नीयोपनिषद्

श्रीवर्द्धमानं जिनवर्द्धमानं,
सूरीन्द्रमेवं गुरुहेमचन्द्रम्।
प्रणम्य नम्यं कथये रहस्यं,
श्रीराजप्रश्नीय उपाङ्गवर्ये॥

आमलकल्पानगर्या बहिस्तादीशानदिश्याम्रशालवननाम चैत्यम्, तत्राशोकपादपस्याधस्तात् पृथ्वीशिलापट्टके श्रमणभगवन्महावीरसमवसरणम्, श्वेतराजधारि-

णीदेवीप्रभृतिपर्षदागमनम्। भगवत्पर्युपासनम्।

तदा सौधर्मे कल्पे सूर्याभे विमाने सुधर्मसभायां सूर्याभदेवस्य सामानिकसहस्रचतुष्ट्यादिपरिवारेण सह दिव्यभोगाननुभवतोऽवधिना जम्बूद्वीपाऽऽभोगः, भगवद्दर्शनेन हर्षादिपुरस्सरं विधिना शक्रस्तवभणनम्, भगवद्वन्दन-देशनाश्रुति-पर्युपासनाभिलाषः, आभियोगिकदेवैः कचनरापनयन-दिव्यसुरभि-जलवृष्ट्यादिकारापणं च।

पदात्यनीकाधिपतिना सुस्वरघण्टा-वादनपुरस्सरं भगवद्वन्दनार्थं गमनाय सूर्याभविमानदेवानामाज्ञापनम्, आभियोगिकैः शीघ्रगमननामयोजनलक्षमानयानविमानविकुर्वणम्, स्वयं जिनेन्द्राभिगमनयोग्योत्तरवैक्रियशरीरविकुर्वणम्, सपरिवारं तद्दिव्ययानेनोत्कृष्टगत्या नन्दीश्वरद्वीप आग्नेयरतिकरपर्वते तद्दिव्यदेवर्द्धिं प्रतिसंहृत्य भगवत्समीप आगमनम्, कथनं च - सूर्याभोऽहं देवो भदन्त ! देवानुप्रियान् वन्दे नमस्यामि यावत् पर्युपास्यामि - इति। भगवत्प्रत्युक्तिः- पौराणं जीतं कृत्य-

माचीर्णमभ्यनुज्ञातं चैतत् सूर्याभ ! यद्-भवनपत्यादिदेवा अर्हद्भगवतो वन्दनादि कृत्वा स्वस्वनामगोत्राणि शंसन्ति - इति।

देशनाश्रवणानन्तरं सूर्याभस्य प्रश्नः - किमहं भवसिद्धिकः सम्यग्दृष्टिः परीत्त-संसारिकः सुलभबोधिक आराधकश्चरमो वा ? एतद्विपरीतो वा ? इति। भव-सिद्धिकोऽसि त्वम्, नाभवसिद्धिक इत्यादिभगवदुत्तरम्। भगवद्भक्तिपूर्वकं गौतमादिश्रमणानां द्वात्रिंशद्विधनाट्यविधिं दर्शयितुं सूर्याभस्यानुज्ञायाञ्चा, भगवतस्त-

दनादरो मौनं च। भगवद्भक्त्यर्थं तेन तन्नाट्यविधिप्रदर्शनम्, वन्दनादि कृत्वा स्वस्थानगमनम्।

क्व गता सा देवर्द्धिरिति गौतमस्वामिप्रश्ने कूटाकारशालानिदर्शनेन भगवदुत्तरम्। क्वास्ति सूर्याभविमानमित्यत्र त्वाह-सौधर्मकल्पे सौधर्मावतंसकविमानस्य पूर्वदिशि तिर्यगसङ्ख्येययोजनानि व्यतिव्रज्यार्धत्रयोदशयोजनलक्षायामविष्कम्भं सूर्याभविमानम्। मनोहरास्तत्र द्वार-तोरण-ध्वज-वनषण्ड-वापी-पञ्चविषययुततृण-

मणि-पद्मवरवेदिकाप्रासादावतंसक-सुधर्मसभा-तद्द्वारमुखमण्डपमणिपीठिका-सिंहासन चैत्यवृक्षमहेन्द्रध्वजमनोगुलिका-माणवकचैत्यस्तम्भ- वज्रसमुद्गकजिनसक्थिप्रभृतय इति सविस्तरं भगवद्वर्णनम्।

देवशयनीयम्, चोप्पालकनामा प्रहरणकोशः, सिद्धायतनम्, तद्गताष्टशतजिनप्रतिमाः, तपनीयमया हस्पादतला अङ्करत्नमया नखा इत्यादिजिनप्रतिमाविभूतिः, चामरधारिप्रतिमादितत्परिवारः, प्रत्येकमष्टशतं घण्टा-कलश-

भृङ्गार-आदर्श-स्थालादीनाम् - इत्यादि सरसं भगवत्प्ररूपणम्।

सिद्धायतनत ईशानदिशि उपपातसभा, तत ईशानदिशि ह्रदः, एवमभिषेकसभा, अलङ्कारसभा, व्यवसायसभा, नन्दा-पुष्करिणी, बलिपीठश्चेति भगवद्व्या-ख्यानम्।

सूर्याभो देव उत्पन्नः सन् यदकरोत्तस्य भगवतोपवर्णनम् - पर्याप्तभावमागतस्य सूर्याभस्य चिन्ता, यथा - किं मे पूर्वं करणीयम् ? किं मे पश्चात् करणीयम् ? किं

मे पूर्वं श्रेयः ? किं मे पश्चाच्छ्रेयः ? किञ्च मे पूर्वं पश्चादपि हित-सुख-क्षम-निःश्रेयसाऽऽनुगामिकत्वार्थं भविष्यति ? - इति। अत्र सामानिकदेवोत्तरम् - सिद्धायतनगताष्टशतजिनप्रतिमानां चैत्य-स्तम्भगतजिनसक्थीनां चार्चनादि देवानु-प्रियाणां पूर्वं पश्चादपि करणीयं श्रेयः हितादिकृच्च - इति।

श्रुत्वैतद् हृष्टस्य सूर्याभस्योपपातस-भातो ह्रद आगमनम्, तत्र स्नातस्याभिषेक-सभायां प्रवेशः, तत्रास्य महार्थ इन्द्रा-

भिषेकः, तत्र सौवर्णरुप्यादिमयाः प्रत्येक-मष्टसहस्रकलशाः, क्षीरोदधिजलप्रभृतेस्त-त्रोपयोगः, सामानिकादिपरिवारेण सर्व-र्द्ध्याऽभिषेके वर्तमाने समग्रविमाने महोत्सवप्रवृत्तिः।

साञ्जलिदेवदेवीनामभिषिक्तं सूर्याभदेवं प्रतीयमुक्तिः - जय जय नन्द जय जय भद्रं ते, अजितं जय, जितं च पालय, जितमध्ये वस इन्द्र इव देवानाम्, चन्द्र इव ताराणाम्, चमर इवासुराणाम्, धरण इव नागानाम्, भरत इव मनुजानाम्,

बहुसागरोपमानि सामानिकचतुःसहस्रादि-बहुदेवदेवीनामाधिपत्यादि कुर्वन् पालयन् विहर-इति कृत्वा जय जय शब्दप्रयोगः।

ततोऽलङ्कारसभायामङ्गलूषणं सर्वालङ्कारालङ्करणं च। ततो व्यवसायसभायां पुस्तकरत्नं वाचयित्वा धार्मिकव्यवसायग्रहणम्। ततो नन्दापुष्करण्यां हस्तपादप्रक्षालनं भृङ्गार-उत्पलादिग्रहणम्।

ततः सपरिवारस्य सिद्धायतन आगमनम्, पूर्वद्वारेण प्रवेशः, जिनप्रतिमा-

ऽऽलोके प्रणामः, लोमहस्तकेन जिन-प्रतिमाप्रमार्जनम्, सुरभिगन्धोदकेन तद-भिषेकः, गोशीर्षचन्द्रनानुलेपः, सुरभि-गन्धकाषायिकेन गात्रलूषणम्, पुष्प-गन्ध-चूर्ण-वर्ण-वस्त्र-आभरणैः पूजा, माल्य-दामकलाप-पञ्चवर्णपुष्पपूञ्जोपचारः, रजततन्दूलैरष्टमङ्गलाऽऽलेखनम्, काला-गुरुतुरुक्कधूपदानम्, अष्टशतमहावृत्तैः स्तुतिः, शक्रस्तवभणनं च।

ततो मुखमण्डपमध्यभागद्वारचेटी - शालभञ्जिकादेरपि प्रमार्जनमभिषेकः

पूजा च।

ततो बलिपीठिकामुपागम्य बलि-विसर्जनम्, आभियोगिकैः सूर्याभविमान-गतशृङ्गाटकादिसर्वस्थानार्चनकारणम्, नन्दापुष्करिण्यां हस्तपादप्रक्षालनम्, सुधर्मसभायां सपरिवारस्य पूर्वाभिमुखस्य निषीदनम्। परिवारस्य स्वस्वभद्रासने निषण्णस्य दिक् सङ्ख्या च -

| सूर्याभदेवमाश्रित्य दिक् | परिवार | सङ्ख्या |
|---|---|---|
| ईशाना + वायव्या | सामानिकाः | ४००० |
| पूर्वा | अग्रमहिष्यः | ४ |

| | | |
|---|---|---|
| आग्नेयी | आभ्यन्तरपर्षद्देवाः | ८००० |
| दक्षिणी | मध्यमपर्षद्देवाः | १०,००० |
| नैऋत्या | बाह्यपर्षद्देवाः | १२,००० |
| पश्चिमा | अनीकाधिपतयः | ७ |
| चतुर्दिक्षु | आत्मरक्षाः | १६,००० |

सूर्याभदेवस्थितिः-पल्योपमचतुष्कम्, तत्सामानिकदेवस्थितिरपि तावती। कथं सूर्याभदेवेनेदृशी महर्द्धिः प्राप्तेत्यत्र भगवदुत्तरम् - इहैव जम्बूद्वीपे भारते वर्षे केकय्यर्थनाम्नि जनपदे श्वेतविकानगरीराजा प्रदेशी, स चात्यन्तमधर्मिष्ठश्चण्डत्वादि-दोषप्रकरकलङ्कितः, सूर्यकान्ता देवी,

सूर्यकान्तः कुमारो युवराजा, राज्यकार्य-चिन्तकः सर्वकार्यपृच्छनीयश्च चित्रसारथिः।

पार्श्वापत्यीय-जात्यादिगुणगणसम्पन्न-चतुर्दशपूर्वि-चतुःज्ञानि-केशिकुमार-श्रमणस्य पञ्चानगारशतैः परिवृत्तस्य श्रावस्तीनगरीगतकोष्ठकचैत्य आगमनम्। राजकार्येण श्रावस्तीं गतस्य चित्रसार-थेस्तद्देशनाश्रुतिर्गृहिधर्मप्रतिपत्तिः, श्वेतवि-कानगराऽऽगमननिमन्त्रणस्य केशिकुमारेण प्रतिषेधः, हेतुत्वेन प्रदेशिराजाधार्मिकता-कथनम्, अन्येषां धार्मिकतयाऽऽगन्त-

व्यमितिचित्रसारथिनिर्बन्धे वर्तमानयोगेने-त्युत्तरम्।

श्वेतविकानगर्यां मृगवनोद्यानपालस्य चित्रसारथिकृतनिर्देशः, यथाकेशिकुमार-श्रमणस्यात्रागतस्य वन्दनादि कर्त्तव्यम्, अवग्रहाद्यनुज्ञापनं कर्त्तव्यम्, मदाज्ञाप्रत्यर्पणं च कर्त्तव्यम् - इति।

केशिकुमारश्रमणस्यान्यदा तत्राऽऽ-गमनम्, पर्षन्निर्गमः, उद्यानपालकैश्चित्रसार-थेस्तज्ज्ञापनम्, हृष्टेन तेन जीविताई-प्रीतिदानम्, गत्वा देशनाश्रुतिः, प्रदेशिनृप-

प्रतिबोधनाय विज्ञप्तिश्च।

केशिकुमारोत्तरम्- चतुःस्थानकैः न प्राप्यते धर्मश्रुतिः, तद्यथा - (१) आरामादिगतश्रमणादेर्वन्दनादि, (२) उपाश्रयगत॰ (३) गोचरगत॰ (४) कथञ्चित् तत्समागम आत्मन आवरणम्। एतद्विपरीतस्थानचतुष्टयेन तु लभेत केवल्युक्तधर्मश्रुतिम्। एवं न शक्यः प्रदेशिप्रतिबोधः - इति।

अश्ववाहिकाव्याजेन तमानेष्यामि, अग्लान्या कथयितव्यो भवता तस्मै धर्मः -

इति चित्रप्रतिवचः।

चित्रसारथिणा युक्त्याऽऽनीतस्य प्रदेशिनृपस्य पर्षदि धर्मं कथयन्तं केशिकुमारश्रमणं दृष्ट्वा चिन्तनम् - जडाः खलु जडं पर्युपासते- इत्यादि।

अवज्ञया किमाहारा यूयमितिपृच्छा, तच्चिन्तितज्ञापनेन केशिकुमारेण तद्विस्मयोत्पादनम्, ज्ञानगोचरतत्प्रश्ने ज्ञानपञ्चकप्ररूपणा च।

प्रदेशी - किं युष्मन्मतेऽन्योऽजीवोऽन्यं शरीरम्, न तज्जीवस्तच्छरीरम् ?

केशिस्वामी - ओम्।

**प्र०** - न ममाधर्मिष्ठ आर्यको नरकादागत्याधर्मान्निवर्त्तयतीत्यतो न पृथगात्मा।

**के०** - यथा वध्यस्य स्वज्ञातिमिलनविज्ञप्तिं त्वं न प्रतीच्छसि, एवं नरकपालनिरुद्धतयाऽशक्तस्तवार्यकोऽप्यत्राऽऽगन्तुम्। नारकानागमने हेतुचतुष्टयम् - (१) महावेदना (२) नरकपालैः भूयो भूयो निरोधः (३) नरकवेदनीयकर्माक्षयः (४) नरकायुःकर्माक्षयः।

**प्र॰** - धार्मिका मदार्यिका देव-लोकादागत्य न मां धर्मे प्रवर्त्तयति, अतो न पृथगात्मा।

**के॰** - यथा स्नातत्वादिगुणोपेतस्त्वं कस्यचिद् वर्चगृहस्थितस्याऽऽमन्त्रणं न प्रतीच्छसि, एवं त्वदार्यिकाऽप्यत्र नागच्छति। देवानागमनहेतुचतुष्टयम् - (१) दिव्यकामभोगमूर्च्छा (२) मानुष्य-प्रेमव्युच्छेदो दिव्यप्रेमसङ्क्रान्तिश्च (३) गमिष्यामीति चिन्तान्तर एवात्रत्याल्पा-युर्जनकालधर्मः (४) मानुष्यदुर्गन्धस्य

प्रतिलोमता च। अतो श्रद्धेहि - अन्यो जीवोऽन्यं शरीरमिति।

**प्र०** - अयःकुम्भीक्षिप्तचौरो मृतः, न तु तत्र छिद्राद्युपलब्धमतो नान्यो जीवः।

**के०** - निश्छिद्रकूटाकारशालाया बहिस्ताद्यथा भेरिशब्दो निर्गच्छति, एवं जीवोऽपि अप्रतिहतगतित्वेन तस्य शैलादिभेदनेऽपि प्रत्यलत्वात्।

**प्र०** - यथा तरुणः शरक्षेपे पटुः, तथा स एव बालत्वेऽपि पटुस्स्यात्तदा भवेत् पृथगात्मसिद्धिः।

**के०** - यथा तरुणस्यापि शरक्षेपासामर्थ्यं भवति धनुरादिवैकल्ये, एवं बालस्याप्यप्रत्यलताऽपर्याप्तोपकरणत्वात्, विज्ञानादिमान्द्यात्।

**प्र०** - वध्यस्य वधस्य प्राक् पश्चाच्च तुल्यमेवाभूद् गौरवम्, अतो न पृथगात्मा।

**के०** - यथा वायुपूर्णबस्तेस्तद्रिक्तायाश्च तुल्यमेव भवति गौरवम्, एवं शरीरस्यापि, अगुरुलघुत्वाज्जीवस्य।

**प्र०** - न चौरस्य सङ्ख्येयधा स्फाटितस्यापि शरीर उपलब्धो मया पृथग्

जीवः, अतो नास्ति सः।

**के०** - मूढतरोऽसि त्वम्, यथा काष्ठभारस्यानेकधा स्फाटितस्याप्यन्तर्नोपलभ्यते ज्योतिः, एवं प्रकृतेऽपि बुध्यताम्।

**प्र०** - कथं बुद्धानामपि भवतां महत्पर्षद्याक्रोशो मयि युज्यते ?

**के०** - किं त्वं पर्षच्चतुष्टयं तदपराधदण्डनीतिं च जानासि ?

**प्र०** - ओम् -

| | |
|---|---|
| पर्षत् | तस्यामपराध्यते दण्डः |
| क्षत्रियप० | हस्तादिछेदो वधो वा |
| गाथापतिप० | तृणाद्यावेष्टनपूर्वमग्निदाहः |
| ब्राह्मणप० | अनिष्टवचसोपालम्भः |
| | कुण्डिकादिलाञ्छनं च |
| ऋषिप० | अनिष्टवचसोपालम्भः |

**के०** - कथं जानानोऽप्येतत्त्वं मम वामं वामेन वर्त्तसे ?

**प्र०** - तथाविधमत्पूर्वसङ्कल्पात्। एतावद्दक्षा यूयं किं समर्था मत्करतले जीवं शरीरादभिनिवर्त्त्य दर्शयितुम् ?

**के०** - वायुप्रदर्शनवदसम्भव्येतत्, छद्मस्थाज्ञेयत्वादशरीरप्रतिबद्धजीवस्य।

**प्र०** - न शक्यं ममाऽर्यकादिपरम्परायाततज्जीवतच्छरीरदृष्टित्यजनम्।

**के०** - तत्त्वं पश्चादनुतापिको भविष्यसि, अयोभारात्यागितया त्रपुर्भारवञ्चितपुरुषस्येव।

**प्र०** - इच्छामि देवानुप्रियाणामन्तिके केवलिप्रज्ञप्तधर्मश्रवणम्।

ततो धर्मं श्रुत्वा प्रतिपन्नोऽसौ

गृहिधर्मम्, सम्प्रधारितवांश्च पुरीं प्रति गन्तुम्।

**के०** - जानासि त्वं कति आचार्याः ? का च तेषां विनयप्रतिपत्तिः ?

**प्र०** - ओम्, (१) कलाचार्यः (२) शिल्पाचार्यः (३) धर्माचार्यः। आद्य-योरुपलेपन - सम्मज्जन-पुष्पादिमण्डन-भोजनेन जीविताहंप्रीतिदान- पुत्रानुपुत्र-वृत्तिकल्पनेन विनयप्रतिपत्तिः। धर्माचार्यस्य तु वन्दन-नमस्कार-सत्कार-सम्मानकरणेन कल्याणं मङ्गलं दैवतं चैत्यं च मत्वा

पर्युपासनेन प्राषुकैषणीयाशनादिना प्रतिलाभनेन च विनयप्रतिपत्तिः।

**के०** - कथं जानानस्याप्येवं तव वामवर्त्तनमक्षामयित्वैव प्रस्थानम् ?

**प्र०** - एवं हि मे सङ्कल्पः, यथा कल्ये सपरिवारमागत्य वन्दनादि कृत्वा क्षामयिष्यामि - इति।

द्वितीयदिने सर्वर्द्ध्या प्रदेश्यागमनम्, वन्दनादि कृत्वा क्षामणम्, स्वस्थानगतस्य राज्यादेरन्तःपुरस्य चानादरः, सूर्यकान्ताराज्ञीसङ्कल्पः - यत्प्रभृत्यसौ श्रमणो-

पासको जातः, तत्प्रभृत्यनादरोऽस्य राज्यादौ, अतः श्रेयो मम तं शस्त्रादिप्रयोगेण मारयित्वा सूर्यकान्तं राज्ये स्थापयित्वा स्वयमेव राज्यश्रियं पालत्या विहरणम् - इति।

स्वसङ्कल्पसिद्ध्यर्थं तया स्वपुत्र-प्रेरणम्, तेन तदवज्ञा, मा भूत्तत्कृते-तद्रहस्यभेद इति राज्ञच्छिद्रान्वेषणम्, छिद्रं ज्ञात्वा सूर्यकान्तया अशनादौ वस्त्रादौ च विषयप्रयोगः, तद् भुञ्जानस्य प्रदेशिनः प्रगाढवेदनाप्रादुर्भावः, सूर्यकान्ताचेष्टितं

ज्ञात्वाऽपि मनसापि तदप्रद्वेषः, पौषधशालागमनम्, अर्हतां केशिकुमारस्य च वन्दनम्, सर्वप्राणातिपातादि- चतुर्विधाहारप्रत्याख्यानम्, शरीरव्युत्सर्गः, समाधिना कालं कृत्वोत्पन्नः सूर्याभदेवतया।

ततोऽपि पल्योपमचतुष्कं स्वायुः पालयित्वोत्पत्स्यतेऽसौ महाविदेहे समृद्धकुले। भविष्यति तस्मिन् गर्भगत एव पित्रोर्दृढा धर्मप्रतिज्ञा। स्थापयिष्यतोऽतस्तन्नाम दृढप्रतिज्ञ इति। पञ्चधात्रीलालितोऽसौ कालेऽधीतद्वासप्ततिकलो

भोगसमर्थो भविष्यति। निमन्त्रयिष्यतस्तत्पितरौ तमन्नादिभोगैः। नास्य तदासक्तिर्भविष्यति, कामैर्जातो भोगैः संवर्धितोऽप्यसौ न तैरुपलेपं प्राप्स्यति, पद्मवत्।

अपि तु स्थविरान्तिके प्राप्तबोधिरसौ प्रव्रज्यानुत्तरज्ञानादिनोत्पादितकेवलवरज्ञानदर्शनो बहुवर्षाणि प्रतिपाल्य केवलिपर्यायं सेत्स्यति।


तदेवं भदन्त ! इति भगवान् गौतमः श्रमणभगवन्महावीरं वन्दनादि कृत्वा संयमेन तपसाऽऽत्मानं भावयन् विहरति।

॥ २९ ॥

मिथ्याऽस्तु दुःसञ्चितं मम। शोधयन्तु बहुश्रुताः। सञ्चयोऽयमाचार्यकल्याणबोधेः कर्मारिशून्यनेत्रे (२०६८) वैशाखासित-चतुर्थ्यां सम्पन्न इति शम्।

## DON'T MISS IT

# શ્રામણ્યનો શ્વાસ





### અષ્ટપ્રવચનમાતા–પ્રતિપાદક
### નૂતન સંસ્કૃત પ્રકરણ

રચનાકાર

### પ.પૂ.આ. શ્રી કલ્યાણબોધિસૂરિજી

## COMING FOR YOU

### ગુરુકુલવાસને સ્વર્ગસમ બનાવવા માટે અવર્જનીય પ્રબંધ




## ગુરુ પ્રત્યે તેત્રીશ આશાતના વિષયક નૂતન સંસ્કૃત પ્રકરણ

રચનાકાર

**પ.પૂ.આ. શ્રી કલ્યાણબોધિસૂરિજી**

# *Don't Miss it.*




मूलकाराः

## श्री दत्तात्रेय अवधूताः

टीकाकाराः

## आ. श्रीकल्याणबोधिसूरयः

## સુકૃત સહયોગી

## શ્રી સીમંધર જિન આરાધક ટ્રસ્ટ

એમરલ્ડ એપાર્ટમેન્ટ, અંધેરી (પૂર્વ), મુંબઈ.

જ્ઞાનનિધિના સદ્વ્યય બદલ
શ્રીસંઘ તથા ટ્રસ્ટીઓની
**ભૂરિ ભૂરિ અનુમોદના**

૧૧૧